किलानयोः समयः शुभमशुभं वा हृदि जातं तत्सर्व्वं परस्परेण कथनीयमिति। अथ कदाचित् राजा तावभ्युपेत्य स्वसुतां तदाराधनाय नियोजितवान्। अथ गच्छति काले नारदस्तु कन्दर्पबाणवशगः राजदुहितरि मनो निदधे। धर्म्मविदपि नारदः व्रीड़मानः तीव्रमिदं मनोभावं भागिनेयाय न शशंस। भागिनेयः पर्व्वतस्तु इङ्गितादिभिर्मातुलं कामार्त्तं वीक्ष्य समयभङ्गादतिक्रुद्धः "इयं नृपसुता तव भार्य्या भविष्यति त्वमपि वानरमूर्त्तिधरोऽत्र विचरिष्यति" इति तं शशाप। एतच्छापात् खलु नारदो वानरमुख आसीत् इति पौराणिकी कथा अत्र अनुसन्धेया॥ विस्तृतिस्तु महाभारते शान्तिपर्व्वणि ३० अध्याये द्रष्टव्या॥)

कपिवल्ली, स्त्री, (कपिरिव कपिलोमसदृशी वल्ली।) गजपिप्पली। इत्यमरः। २। ४। ९६॥

कपिशः पुं, (कपिः वर्णविशेषः अस्त्यस्य कपिनामास्त्यस्ति वा लोमादित्वात् शः।) श्यावः। कृष्णपीतमिश्रितवर्णः। तद्युक्ते त्रि। इत्यमरः १।५।१६॥ (यथा, रघुः १२। २८।

"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः"॥

सर्व्ववर्णमयत्वात् शिवः। यथा, महाभारते १३। शिवसहस्रनामकीर्त्तने १७। ९७।

"कपिलः कपिशः शुक्लः आयुश्चैव परोऽपरः"॥) सिह्लकनाम गन्धद्रव्यम्। इति मेदिनी॥

कपिशाञ्जनः, पुं, (कपिशं अञ्जनं कपिशयुक्तं अञ्जनं वा यत्र। अञ्जनस्य कृष्णवर्णतया तस्य श्वेतवर्णत्वाच्च एवमुच्यते।) शिवः। इति त्रिकाण्डशेषः॥

कपिशापुत्त्रः पुं, (कपिशायाः मदोन्मत्तायाः पिशाच्याः पुत्त्रः।) पिशाचः। इति शब्दमाला॥

कपिशी, स्त्री, (कपिश इति वर्णवाचितया ङीष्।) माधवी। मदिरा। इति मेदिनी जटाधरश्च॥ (हलायुधमतेऽस्य क्लीवत्वमपि दृश्यते॥)

कपिशीका, स्त्री, (कपिश+स्वार्थे बाहुलकात् ईकन् टाप् च।) मदिरा। इति त्रिकाण्डशेषः॥

कपिशीर्षं, क्ली, (कपीनां प्रियस्थानं शीर्षं वृक्षप्राकारादीनां शिरोदेश एव कपिप्रियत्वात् प्रसिद्धः। शाकपार्थिवादित्वात् समासः।) प्राकाराग्रम्। तत्पर्य्यायः॥ खोड़कशीर्षकम् २ कपशीर्षम् ३। इति त्रिकाण्डशेषः॥

कपिशीर्षकं, क्ली, (कपीनां शीर्षवर्णवत् कायति प्रकाशते। कै+कः।) हिङ्गुलम्। इति शब्दचन्द्रिका॥ (हिङ्गुलशब्देऽस्य गुणादयो व्याख्येयाः॥)

कपीकच्छुः, पुं, (कपिकच्छुरिति संज्ञायां वा दीर्घः।) कपिकच्छुः। इति शब्दरत्नावली॥

कपीज्यः, पु, (कपिभिर्वानरैरतिप्रियत्वात् इज्यते पूज्यते। कपि+यज्+क्यप्।) क्षीरिकावृक्षः। इति जटाधरः॥ (रामचन्द्रः। इति व्युत्पत्त्यर्थः॥)

कपीतः, पुं, (कं जलं तत्तुल्यश्वेतवर्णं अपि इतः प्राप्तः अपेरल्लोपः। यद्वा कपिभिरितः प्रियत्वेन प्राप्तः।) श्वेतवुङ्गावृक्षः। इति रत्नमाला॥

कपीतनः, पुं, (कपीनां ईं लक्ष्मीं तनोति विस्तारयतीति। कपि+ई+तन्+पचाद्यच्। कपीनां कपेर्वर्णस्य वा तनः। अन्येषामपीति। ६। ३। १३७। दीर्घः।) आम्रातकवृक्षः। गर्द्दभाण्डवृक्षः। शिरीषवृक्षः। इत्यमरः। २। ४। २७॥ अश्वत्थवृक्षः। इति मेदिनी। गुवाकवृक्षः। विल्ववृक्षः। इति शब्दरत्नावली॥ (आम्रातकशब्दे शिरीषशब्दे अश्वत्थशब्दे विल्वशब्दे चास्य गुणादयो ज्ञातव्याः॥)

कपीन्द्रः, पुं, (कपिश्चासौ इन्द्रश्चेति कपिरिन्द्र इव इति वा।) हनूमान्। इति शब्दरत्नावली॥ (कपीनां वानराणामिन्द्रः। सुग्रीवः। बाली। इति रामायणम्॥ विष्णुः। यथा, महाभारते। १३। विष्णुसहस्रनामकीर्त्तने १४९। ६६।

"शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः"॥)

कपीष्टः, पुं, (कपीनां इष्टः प्रियः।) राजादनीवृक्षः। कपित्थः। इति राजनिर्घण्टः॥ (कपित्थशब्देऽस्य गुणादय उक्ताः॥)

कपोतः, पुं, (को वायुः पोतः नौरिवास्य। यद्वा कव वर्णे+ "कवेरोतच् पश्च"। उणां।१।६२। इति ओतच्+वस्य पश्च।) गृहकपोतः। पायरा इति भाषा। तत्पर्य्यायः। कलरवः २ पारावतः ३। इत्यमरः। २। ५। १४॥ पारापतः ४ छेद्यः ५ रक्तलोचनः ६। इति रभसः॥ गृहकुक्कुटः ७। यथा,—

"मार्जाररक्षिते दुःखं यादृशं गृहकुक्कुटे"।

इति प्रयोगात् इति सारसुन्दरी॥

(यथा, रामायणे। ५। ९१। ४।

"श्रूयते हि कपोतेन शत्रुः शरणमागतः।
अर्च्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः"॥)

वनकपोतः। घुघु इति भाषा। तत्पर्य्यायः। चित्रकण्ठः २। इति मेदिनी॥ कोकदेवः ३ धूसरः ४ धूम्रलोचनः ५ दहनः ६ अग्निसहायः ७ भीषणः ८ गृहनाशनः ९। तन्मांसगुणाः। वीर्य्यबलवृद्धिकारित्वम्। स्वादुत्वम्। कफपित्तास्रनाशित्वञ्च। इति राजनिर्घण्टः॥ मधुरत्वम्। शीतत्वम्। कषायत्वम्। वातपित्तनाशित्वम्। सार्षपतैलभर्जनेन विरुद्धत्वञ्च। इति राजवल्लभः॥

(अस्य गुणान्तरं यथा,—

"पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः।
संग्राही शीतलस्तज्ज्ञैः कथितो वीर्य्यवर्द्धनः"॥

इति भावप्रकाशः॥

"कपोतो बृंहणो बल्यो वातपित्तविनाशनः।
तर्पणः शुक्रजननो हितो नृणां रुचिप्रदः"॥

इति हारीतः॥ कपोतविशेषस्य गुणाः॥ यथा,—

"गुरुः सलवणः काणकपोतः सर्व्वदोषहृत्"॥

इति वाभटः॥

"कषायमधुराः शीता रक्तपित्तनिवर्हणाः।
विपाके मधुराश्चैव कपोता गृहवासिनः॥ १॥
तेभ्यो लघुतराः किञ्चित् कपोता वनवासिनः।
शीताः संग्राहिणश्चैव स्वल्पं मूत्रकराश्च ते"॥ २॥

इति चरकः॥

"सर्व्वदोषहरस्तेषां भेदाश्मी मलदूषकः।
कषायस्वादुलवणो गुरुः काणकपोतकः"॥

इति सुश्रुतः॥)

कपोतकं, क्ली, (कपोत इव कपोतवर्णवत्त्वात् कायति प्रकाशते। कै+कः।) सौवीराञ्जनम्। इति राजनिर्घण्टः॥

कपोतचरणा, स्त्री, (कपोतचरणः चरणाकारो अस्त्यस्याः।) नलीनामगन्धद्रव्यं। इति जटाधरः॥

कपोतपालिका, स्त्री, (पालयति इति। पाल रक्षणे+ कर्त्तरि ण्वुल्। कपोतानां पालिका कपोतान् पालयति इति वा कर्म्मण्यण्।) विटङ्कः। सौधादिप्रान्तकाष्ठादिरचितपक्षिस्थानम्। इत्यमरः। २। २। १५॥ पायरार खोप इति भाषा॥

कपोतपाली, स्त्री, (कपोतान् पालयति इति। पाल कर्म्मण्यण् ङीप् च। केचित्तु पाल+अच् गौरादित्वात् ङीष्।) कपोतपालिका। इति हलायुधः॥ (यथा माघे ३। ५१।

"चिक्रंसया कृत्रिमपत्त्रिपङ्क्तेः
कपोतपालीषु निकेतनानाम्"॥)

कपोतवङ्का, स्त्री, (कपोतो वङ्क्यते प्रतार्य्यतेऽनया। वन्च+करणे घञ् कुत्वं टाप् च।) ब्राह्मीवृक्षः। इति राजनिर्घण्टः॥ (यथा सुश्रुते।

"कपोतवङ्कामूलं हि पिबेदश्मरादिभिः"॥)

कपोतवर्णी, स्त्री, (कपोतस्य वर्ण इव वर्णो यस्याः गौरादित्वात् ङीष्।) सूक्ष्मैला। इति राजनिर्घण्टः॥ (सूक्ष्मैलाशब्देऽस्या विशेषो ज्ञेयः॥)

कपोतवाणा, स्त्री, (कपोतपाद इव यो वाणः तद्वदाकारोऽस्याः।) नलिकानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कपोतसारं, क्ली, (कपोतः कपोतवर्ण इव सारः कृष्णवर्णो यत्र।) स्रोतोऽञ्जनम्। इति राजनिर्घण्टः॥

कपोताङ्घ्रिः, स्त्री, (कपोतस्य अङ्घ्रिरिव।) नलीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२१॥

कपोताभः, पुं, (कपोतस्य आभा इव आभाऽस्य।) कपोतवर्णः। इति हेमचन्द्रः॥ (मूषिकभेदः।

"मूषिकाश्च कपोताभस्तथैवाष्टादश स्मृताः"।

इति सुश्रुतः॥)

कपोतारिः, पुं, (कपोतानां अरिः शत्रुः।) श्येनपक्षी। इति शब्दरत्नावली॥

कपोलः, पुं, (कम्प्यते "कपिगडि कटिपटिभ्य ओलच्"। उणां १। ६७। इति ओलच् कपि इति निर्द्देशात् नलोपः। कं सुखं पोलतीति वा पुलमहत्त्वे कर्म्मण्यण्।) चक्षुस्तिर्य्यक्सन्निधिभागः। गाल इति भाषा। तत्पर्य्यायः। गण्डः २। इत्यमरः। २। ६। ९०॥ गल्लः ३। इति राजनिर्घण्टः॥ (यथा रघुः। ४। ६८।

"तत्र हूणावरोधानां भर्त्तृषु व्यक्तविक्रमम्।
कपोलपाटलादेशि बभूव रघुचेष्टितम्"॥)

कफः, पुं, (केन जलेन फलति इति। फल निष्पत्तौ "अन्येष्वपि" ३। २। १०१। इति डः। के शिरसि फणति वा शाबवत्तुः।) शरीरस्थधातुविशेषः। तत्पर्य्यायः। श्लेष्मा २ संघातः ३ सौम्यधातुः ४